# 2022

## 1st Semester Examination

## SANSKRIT

### Paper : SANS - 102

Full Marks : 40 Time : 2 Hours

*The figures in the margin indicate full marks. Candidates are required to give their answers in their own words as far as practicable.*

सर्वे प्रश्नाः संस्कृतेनैव समाधेयाः ।

1. प्रश्नद्वयं समाधेयम् : 10×2=20

(क) प्रत्याहारः कथं सिध्यति? प्रत्याहारेषु इत्संज्ञकानां ग्रहणं किं भवेत्? कथं वा — सोदाहरणमालोच्यताम्। 2+1+7

अथवा

का नाम परिभाषा? 'स्थानेऽन्तरतमः' इति सूत्रे अन्तरतम-शब्दस्य कोऽर्थः? अन्तरतमत्वं कुतः सिध्यति? सोदाहरणं व्याख्याय अनेकान्तरतमस्थले कः पन्थाः — आलोचनीयः। 2+1+2+5

(ख) 'स्थानिवदादेशोऽनल्विधौ' इति सूत्रं व्याख्याय सुध् य् उपास्यः इत्यत्र किं य-कारस्य प्रस्तुतसूत्रेण स्थानिवद्भावो भवेन्न वेति सयुक्ति आलोच्यताम्। 4+6

P.T.O.

**अथवा**

'ङ्याप्प्रातिपदिकात्' इति सूत्रस्यार्थः कः ? कीदृशं सूत्रमिदम् ? प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति परिभाषां व्याख्याय प्रकृतसूत्रे ङ्याब्ग्रहणसार्थक्यं प्रतिपादयत। 2+1+4+3

2. यथानिर्देशमुत्तरं प्रदेयम् :

(क) द्वयोर्व्याख्या कार्या : 5×2=10

(i) मुखनासिकावचनोऽनुनासिकः।

(ii) तुल्यास्यप्रयत्नं सवर्णम्।

(iii) आद्यन्तौ टकितौ।

(ख) ससूत्रं संसाध्यताम् (द्वयम्) : 2½×2=5

(i) मध्वरिः

(ii) गव्यूतिः

(iii) हरिएतौ

(iv) पावकः

(ग) ससूत्रं संसाध्यताम् (द्वयम्) : 2½×2=5

(i) रामाः

(ii) रामान्

(iii) रामाय

(iv) सर्वेषाम्